# B.A. 3rd Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 30912** **Course Code : AH/SNS-302C-6**

Course Title: Indian Social Institution and Polity

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु यथेच्छं *पञ्चानाम्* उत्तराणि लिखत। *एकस्य* उत्तरम् अवश्यमेव संस्कृतभाषया देवनागरीलिप्या च देयम्। 2×5=10

(a) प्रभुः राजानं किमर्थं सृष्टवान्?

(b) उपायचतुष्टयं किमिति मनुसंहितानुसारं लिखत।

(c) याज्ञवल्क्यसंहितानुसारं कति प्रमाणानि? कानि च तानि?

(d) 'विवादयेत् सद्य एव'– केषु विषयेषु उत्तरपादलेखनकाले कालप्रतीक्षणं न कर्तव्यम्?

(e) अर्थशास्त्रानुसारं ब्राह्मणस्य कर्तव्यं किम्?

(f) बृहस्पत्यनुसारं कति विद्या? काश्च ताः?

(g) प्रत्यर्थिनः अग्रतः लेखनकाले अर्थी सुस्पष्टतया केषां विषयाणाम् उल्लेखं कुर्यात्?

(h) अर्थशास्त्रे उक्तानां चतुर्णाम् आचार्याणां नामानि लिखत।

**2.** यथेच्छं *द्वयोः* श्लोकयोः सप्रसङ्गव्याख्या संस्कृतभाषया देवनागरीलिपिम् आश्रित्य कार्या। 5×2=10

(a) अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात्।
रक्षार्थम् अस्य सर्वस्य राजानमसृजत् प्रभुः।।

(b) दण्डः शास्ति प्रजाः सर्वाः दण्ड एवाभिरक्षति।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः।।

(c) अपि यत् सुकरं कर्म तदप्येकेन दुष्करम्।
विशेषतोऽसहायेन किमु राज्यं महोदयम्।।

**3.** यथेच्छम् *एकस्य* श्लोकस्य संस्कृतभाषया देवनागरलिप्या सप्रसङ्गव्याख्या कार्या। 5×1=5

(a) स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्।।

(b) पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी।
परेण भुज्यमानायाः धनस्य दशवार्षिकी।।

**4.** अधोनिर्दिष्टयोः *एकः* प्रश्नः संस्कृतभाषया देवनागरीलिप्या च समाधेयः। 5×1=5

(a) अर्थशास्त्रम् अनुसृत्य त्रयीविषयिणी टीका लेख्या।

(b) अर्थशास्त्रम् आश्रित्य आन्वीक्षिकीविषये टिप्पणी लेख्या।

**5.** कश्चन *एकः* प्रश्नः संस्कृतभाषया देवनागरीलिपिम् आश्रित्य समाधेयः। 10×1=10

(a) अमात्यनियुक्तिविषये पूर्वाचार्याणां मतानि उक्त्वा कौटिल्यमतम् आलोचयत।

(b) याज्ञवल्क्यसंहितानुसारम् ऋणदानस्वरूपं वर्णनीयम्।

(c) मनुसंहितानुसारं राज्यशासने दण्डस्य गुरुत्वं वैशद्येन आलोचनीयम्।

---

*AH-III/SNS-303C-7/19*

## B.A. 3rd Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 30913** **Course Code : AH/SNS-303C-7**

Course Title: History of Vedic Literature and Theory of Self

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** *पञ्च*प्रश्नानाम् उत्तराणि लिखत। *एकस्य* उत्तरं संस्कृतभाषया देवनागरलिप्या च अवश्यमेव लेख्यम्। 2×5=10

(a) ऋग्वेदस्य कति शाखा:? तासां नामानि लिखत।

(b) ऋग्वेदे कति मण्डलानि सन्ति? नवममण्डलस्य नाम किम्?

(c) ब्राह्मणं नाम किम्? अथर्ववेदस्य ब्राह्मणस्य नाम लेख्यम्।

(d) वेदाङ्गानि कति? तासां नामानि लिखत।

(e) ईशोपनिषत् कस्मिन् वेदे वर्तते? अस्या: अपरं नाम किम्?

(f) आरण्यकं नाम किम्? सामवेदस्य आरण्यकानां नामानि लिखत।

(g) अथर्ववेदसंहितायां कति काण्डानि सन्ति? अस्य वेदस्य अपरं नाम किम्?

(h) उपनिषच्छब्दस्य व्युत्पत्ति: लेख्या। कृष्णयजुर्वेदस्य उपनिषद्द्वयस्य नाम लिखत।

**2.** *द्वयो:* प्रश्नयो: संस्कृतभाषया देवनागरलिप्या च उत्तरं लिखत। 5×2=10

(a) स यथा वीणायै वाद्यमानायै न बाह्याञ्-शब्दाञ्-शक्नुयाद्
ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीत:।। — व्याख्या करणीया।

(b) एतेभ्यो भूतेभ्य: समुत्थाय तान्येवानुविनश्यति न
प्रेत्य संज्ञाऽस्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्य:। — मन्त्रांशस्य व्याख्या कार्या।

(c) सा होवाच मैत्रेयी। यत्नु म इयं भगो: सर्वा पृथिवी वित्तेन
पूर्णा स्यात् कथं तेनामृता स्यामिति नेति होवाच याज्ञवल्क्यो
यथैवोपकरणवतां जीवितं तथैव ते जीवितं
स्यादमृतत्वस्य तु नाशाऽस्ति वित्तेनेति। — व्याख्या करणीया।

**3.** निम्नप्रदत्तेषु *द्वयोः* मन्त्रयोः संस्कृतभाषया देवनागरलिप्या च व्याख्या कार्या। 5×2=10

(a) यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः।

तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम्।।

(b) एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम्।

विरजः पर आकाशादज आत्मा महान् ध्रुवः।।

(c) अनन्दा नाम ते लोका अन्धेन तमसावृताः।

तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधो जनाः।।

(d) यदैतमनुपश्यत्यात्मानं देवमञ्जसा।

ईशानं भूतभव्यस्य न ततो विजुगुप्सते।।

**4.** *एकस्य* प्रश्नस्य संस्कृतभाषया देवनागरलिप्या च उत्तरं लिखत। 10×1=10

(a) किं नाम संवादसूक्तम्? ऋग्वेदस्य संवादसूक्तम् आश्रित्य कश्चन लघुप्रबन्धो विरच्यताम्।

(b) यजुर्वेदस्य विषयसारं संक्षेपेण उल्लिख्य अस्य वेदस्य माहात्म्यम् आलोच्यताम्।

(c) बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणस्य नाम किम्? समासेन अस्य ब्राह्मणस्य प्रतिपाद्यविषया निरूपणीयाः।

———

*AH-III/SNS-304GE-3/19*

## B.A. 3rd Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 30914** **Course Code : AH/SNS-304GE-3**

Course Title: History of Sanskrit Literature and Translation

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु यथेच्छं विषय*चतुष्टयम्* आश्रित्य टीका लेख्या। 5×4=20

নিম্নলিখিত প্রশ্নগুলির মধ্যে যথেচ্ছ *চারটি* বিষয় অবলম্বন করে টীকা লেখো।

(a) अश्वघोष:

(b) माघ:

(c) शूद्रक:

(d) उत्तररामचरितम्

(e) मूद्राराक्षसम्

(f) गीतगोविन्दम्

**2.** अधोलिखितेषु *एकस्य* उत्तरं देयम्। 10×1=10

নিম্নলিখিত প্রশ্নগুলির মধ্যে *একটির* উত্তর লেখো।

(a) महाभारतोत्तरकाले समाजे साहित्ये च महाभारतस्य प्रभाव आलोच्यताम्।

মহাভারতোত্তরকালে সমাজে ও সাহিত্যে মহাভারতের প্রভাব আলোচনা করো।

(b) संस्कृतकथासाहित्यमाश्रित्य कश्चन निबन्धो लेख्य:।

সংস্কৃত কথাসাহিত্যকে অবলম্বন করে একটি নিবন্ধ লেখো।

(c) महाकवे: कालिदासस्य नाटकत्रयम् आश्रित्य कश्चन निबन्धो लेख्य:।

মহাকবি কালিদাসের নাটক তিনটিকে অবলম্বন করে একটি নিবন্ধ লেখো।

**3.** अधोलिखितेषु सरलसंस्कृतभाषया देवनागरलिप्या च यथेच्छं *पञ्चकस्य* अनुवादं कुरु। 2×5=10

নিম্নলিখিত বাক্যগুলির মধ্যে *যে কোনো পাঁচটি* বাক্যের অনুবাদ করো।

(a) পৃথিবীর ভাষাসমূহের মধ্যে সংস্কৃতভাষা প্রাচীনতমা।

(b) এই ভাষা ভারতীয় সভ্যতার ধারক ও বাহক।

(c) রামায়ণ ও মহাভারত নামক মহাকাব্য দুইটি এই ভাষাতেই রচিত।

(d) ভারতীয় প্রধান ভাষাসমূহের জননী এই ভাষা।

(e) তাই এই ভাষা অবশ্যই শিখতে হবে।

(f) ছাত্ররাই আমাদের দেশের ভবিষ্যৎ আশা ও শক্তি।

(g) নিয়মানুবর্তিতা ছাত্রজীবনের প্রাণস্বরূপ।

(h) শিক্ষকদের প্রতি শ্রদ্ধা, অনুশাসনের প্রতি আনুগত্য ছাত্রদের অবশ্যই পালন করা উচিত।

———————

# B.A. 3rd Semester (Honours) Examination, 2019-20

# SANSKRIT

**Course ID : 30915** **Course Code : AH/SNS-305-SEC-1**

Course Title: Spoken Sanskrit & Computer Application

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**Spoken Sanskrit**

**A.** समीचीनमुत्तरं चिनुत (MCQ): 2×10=20

**1.** 'भक्ताः देवं नमन्ति' इत्यस्य वाच्यपरिवर्तने किं रूपम्?

(a) भक्तैः देवं नम्यते (b) भक्ताः देवं नम्यते

(c) भक्तैः देवः नमन्ति (d) भक्तैः देवः नम्यते

**2.** जनैः व्यवहारः __________।

(a) क्रियते (b) आक्रियन्त

(c) कृतवान् (d) अक्रियेताम्

**3.** बालेन पाठः __________।

(a) पठितम् (b) पठितः

(c) पठिताः (d) पठिता

**4.** 'अहं चित्राणि दृष्टवान्' इत्यस्य वाच्यपरिवर्तने किं रूपम्?

(a) अहं चित्राणि दृष्टवान् (b) मया चित्राणि दृष्टवान्

(c) मया चित्राणि दृष्टानि (d) मया चित्रं दृष्टम्

**5.** __________ नारी।

(a) सुन्दरम् (b) सुन्दरी

(c) सुन्दरः (d) सुन्दरे

**6.** __________ विना विद्या न भवति।

(a) श्रमम् (b) श्रमाय

(c) श्रमस्य (d) श्रमे

**7.** महिला घटं __________ ।

(a) नयसि (b) नयतः

(c) नयत (d) नयन्ति

**8.** ते बालिके काव्यम् __________ ।

(a) अपठत् (b) अपठताम्

(c) अपठन् (d) अपठः

**9.** भवन्तः स्वकार्यं __________ ।

(a) करोतु (b) कुर्वन्तु

(c) कुरु (d) कुरुताम्

**10.** वसन्ते मयूराः __________ ।

(a) नर्तिष्यन्ति (b) नर्तिष्यति

(c) नर्तिष्यथ (d) नर्तिष्यतः

## Computer Application

Answer *all* questions (MCQ): 2×10=20

**11.** Which of the following is not an input device?

(a) Keyboard (b) Web Cam

(c) Scanner (d) Printer

**12.** ISCII stands for

(a) Indian Standard Code for Information Interchange.

(b) Indian Standard Code for International Interchange.

(c) Indian Script Code for Information Interchange.

(d) Indian Suitable Code for Institutional Interchange.

**13.** The decimal number 17 is equivalent to binary number

(a) 10001 (b) 10101

(c) 01010 (d) 11010

**14.** Which command is used to restore a sentence erased just now?

(a) Undo (b) Redo

(c) Add (d) Insert

**15.** Which of the following is an Open Source DBMS?

(a) MySQL (b) Microsoft SQL Server

(c) Microsoft Access (d) Oracle

**16.** Internal communication within institutions is done through

(a) LAN
(b) WAN
(c) EBB
(d) MMS

**17.** Baraha is the Unicode and ANSI text editor for __________.

(a) Indian languages
(b) German
(c) French
(d) Russian

**18.** OCR stands for

(a) Output Character Recognition
(b) Optical Character Recognition
(c) Output Character Recorder
(d) Optical Character Recorder

**19.** Programming language which sometimes called 'write once, run anywhere' is

(a) Java
(b) Basic
(c) Pascal
(d) Ada

**20.** Compiler translates

(a) High level language to Machine language
(b) Assembly language to Machine language
(c) Machine language to High level language
(d) Machine language to Assembly language

---

# B.A. 3rd Semester (Programme) Examination, 2019-20

## SANSKRIT

**Course ID : 30918** **Course Code : AP/SNS/301C/1C**

Course Title: History of SNSK Lit.

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोनिर्दिष्टेषु *एकस्य* प्रश्नस्य उत्तरं लेख्यम्। 10×1=10

নিম্নে নির্দিষ্ট প্রশ্নগুলির মধ্যে *একটির* উত্তর লেখো।

(a) सविशदं पुराणसाहित्यस्य वैशिष्ट्यानि आलोच्यन्ताम्।

পুরাণসাহিত্যের বৈশিষ্ট্যগুলি বিশদভাবে আলোচনা করো।

(b) भवभूतेः नाट्यकृतिम् आश्रित्य निबन्धो लेख्यः।

ভবভূতির নাট্যকৃতিকে আশ্রয় করে নিবন্ধ লেখো।

(c) संस्कृतसाहित्ये रामायणस्य प्रभावः सविशदम् आलोच्यताम्।

সংস্কৃতসাহিত্যে রামায়ণের প্রভাব বিশদভাবে আলোচনা করো।

**2.** अधोलिखितेषु यथेच्छं विषय*चतुष्टयम्* आश्रित्य टीका लेख्याः। 5×4=20

নিম্নলিখিত বিষয়গুলির মধ্যে যে কোনো *চারটি* বিষয় অবলম্বন করে টীকা লেখো।

(a) श्रीहर्षः

(b) माघः

(c) गीतिकाव्यम्

(d) हितोपदेशः

(e) बृहत्कथा

(f) दशकुमारचरितम्

(g) शतककाव्यम्

**3.** অধোলিখিতেষু *পঞ্চ*-বাক্যানাং সংস্কৃতভাষয়া অনুবাদঃ কার্যঃ। 2×5=10

নিম্নলিখিত বাক্যগুলির মধ্যে *পাঁচটি* বাক্যের সংস্কৃতভাষায় অনুবাদ করো।

(a) বাল্মীকি প্রথম জীবনে একজন দস্যু ছিলেন।

(b) আমি নদীর শুদ্ধ জল পান করতে চাই।

(c) দয়া হল শ্রেষ্ঠ ধর্ম।

(d) আমার বাড়ির সামনে একটি সুন্দর মাঠ আছে।

(e) এই বার্তা শুনে তোমার মা ও বাবা আনন্দিত হবেন।

(f) বালিকাটি ময়ূর দেখে নাচছে।

(g) মুনিটি ভক্তির সঙ্গে পূজা করছেন।

(h) সূর্য উঠলে পদ্ম প্রকাশিত হয়।

## B.A. 3rd Semester (Programme) Examination, 2019-20

## SANSKRIT

**Course ID : 30910** **Course Code : AP/SNS-305-SEC-1**

Course Title: Spoken Sanskrit

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

सर्वे प्रश्नाः समाधेयाः 2×20=40

**1.** '__________' प्रति दयां कुरु'– रिक्तस्थाने समीचीनं पदं चिनुत।

(a) दीनं (b) दीनः

(c) दीनस्य (d) दीनाय

**2.** 'क्रोशं कुटिला नदी'– अत्र द्वितीया

(a) करणे (b) अत्यन्तसंयोगे

(c) अपवर्गे (d) हेतौ

**3.** लङ्-लकारः कस्मिन् काले भवति?

(a) वर्तमानकाले (b) अतीतकाले

(c) भविष्यकाले (d) परोक्षातीतकाले

**4.** अहं महाविद्यालयं __________। रिक्तस्थाने समीचीनं पदं चिनुत।

(a) गच्छति (b) गच्छामि

(c) गच्छामः (d) गमिष्यति

**5.** 'पार्थः वेदान् पठितवान्'– इति वाक्यस्य वाच्यपरिवर्तने किं रूपम्?

(a) पार्थेन वेदाः पठिताः (b) पार्थः वेदाः पठिता

(c) पार्थेनः वेदः पठित (d) पार्थः वेदः पठितवती

**6.** 'अहं मृगं पश्यामि'– इति वाक्यस्य वाच्यपरिवर्तने किं रूपम्?

(a) मया मगृः दृश्यते (b) अहं मृगं पश्यति

(c) मया मृगः पश्यामि (d) अहं मृगं पश्यन्ति

**7.** '<u>प्राते</u> द्विजाः सूर्यम् आसते'– रेखाङ्कितपदस्य शुद्धं रूपं किम्?

(a) प्रातः (b) प्रातस्य

(c) प्राताय (d) प्रातेन

**8.** 'मे मनसि सुखं नास्ति'– अशुद्धं पदं चिनुत।

(a) मे (b) मनसि

(c) सुखं (d) नास्ति

**9.** 'पिता-सह आपणं गच्छति'– रिक्तस्थानं समीचीनपदेन पूरयत।

(a) पुत्रय (b) पुत्रेण

(c) पुत्रस्य (d) पुत्रः

**10.** एतत् फलानि– रेखाङ्कितपदस्य शुद्धं रूपं किम्?

(a) एतस्य (b) एतानि

(c) एते (d) एतनि

**11.** 'गुरुः माणवकं धर्मं शास्ति– इत्यस्य वाच्यपरिवर्तने किम् रूपम्?

(a) गुरुः माणवकं धर्मं शिष्टते (b) गुरूणा मानवकं धर्मः शिष्यते

(c) गुरुणा माणवकः धर्मं शिष्यते (d) गुरुणा माणवकः धर्मं शास्ति

**12.** "______ सह आगतः छात्रः।" समीचीनपदं चित्वा शून्यस्थानं पूरणीयम्।

(a) शिष्येण (b) शिष्याय

(c) शिष्यात् (d) शिष्यम्

**13.** बालकः बालिकां __________।

(a) पश्यन्ति (b) पश्यसि

(c) पश्यति (d) पश्यामि

**14.** __________ उदिते पद्मं प्रकाशते।

(a) सूर्यः (b) सूर्येन

(c) सूर्ये (d) सूर्यस्य

**15.** __________ पुरुषः।

(a) विद्वांसो (b) विद्वानः

(c) विदुषः (d) विद्वान्

**16.** __________ पुत्राः। रिक्तस्थाने समीचीनं पदं चिनुत।

(a) चत्वारः (b) चतस्रः

(c) चत्वारि (d) चतस्रि

**17.** 'रुदति पुत्रे पिता गृहं त्यजति'– इत्यत्र सप्तमी

(a) भावे (b) अवच्छेदे

(c) अनादरे (d) निर्धारणे

**18.** लट्-लकारः कस्मिन् काले भवति?

(a) वर्तमानकाले
(b) अतीतकाले
(c) भविष्यकाले
(d) परोक्षे अतीतकाले

**19.** 'अम्बे मह्यं जलं देहि'– अशुद्धं पदं चिनुत

(a) अम्बे
(b) मह्यं
(c) जलं
(d) देहि

**20.** सुन्दराः पक्षिणः __________। रिक्तस्थानं समीचीनं पदं चित्वा पूरयत।

(a) कूजति
(b) कूजतः
(c) कूजन्ति
(d) कुजन्ति

*AP-III/SNS/303C-MIL-2/19*

# B.A. 3rd Semester (Programme) Examination, 2019-20

## SANSKRIT

**Course ID : 30919** **Course Code : ACP/303C/MIL-2**

Course Title: MIL-2

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** निम्नलिखितप्रश्नेषु *पञ्च*प्रश्नानाम् उत्तरं प्रदेयम्। 2×5=10

(a) पञ्चतन्त्रं केन विरचितम्? पञ्चतन्त्रं कीदृशं साहित्यम्?

(b) ब्राह्मणपुत्राः किमर्थं देशान्तरं गन्तुमिष्टवन्तः?

(c) पञ्चतन्त्रस्य कति अनुवादाः समुपलभ्यन्ते? पञ्चतन्त्रमित्यत्र तन्त्रपदेन किमुच्यते?

(d) विष्णुशर्मणा कथं पञ्चतन्त्र-ग्रन्थः रचितः?

(e) पञ्चानां तन्त्राणां नामानि कानि?

(f) "तर्हि प्रतीक्षस्व क्षणं यावदहं वृक्षमारोहामि"–कः कदा उक्तवान्?

(g) गङ्गादत्तः कः? स कस्मिन् स्थाने प्रतिवसति स्म?

(h) वानरमकरकथा कस्मिन् तन्त्रे अस्ति? तस्य तन्त्रस्य नाम किम्?

**2.** अधोनिर्दिष्टेषु यथानिर्देशं *चत्वारः* प्रश्नाः समाधेयाः। 5×4=20

(a) अधोलिखितेषु *पञ्चानां* सन्धिः कार्यः। 5

(i) अव + एहि (ii) नदी + अम्बु (iii) अति + आचार (iv) देवः + अत्र (v) मृत् + मयः (vi) वृक्ष + छाया (vii) शीत + ऋतः

(b) अधोलिखितेषु *पञ्चानां* सन्धिविच्छेदः कार्यः। 5

(i) भास्करः (ii) पतञ्जलिः (iii) आविष्कारः (iv) अहरहः (v) दिगन्तः (vi) महद्धितम् (vii) प्रातरेव

(c) अधोलिखितेषु *पञ्चानां* विग्रहवाक्यम् उल्लिख्य समासः निरूपणीयः। 5

(i) पाणिपादम् (ii) हरिहरौ (iii) सिंहासनम् (iv) दुर्भिक्षम् (v) वीणापाणिः (vi) मातापितरौ (vii) त्रिलोकी

(d) अधोलिखितेषु *पञ्चानां* समासबद्धरूपं लिखित्वा समासः निरूपणीयः।

(i) युवतिः जाया यस्य सः।

(ii) दिवसे दिवसे।

(iii) रूपस्य योग्यम्।

(iv) शक्तिम् अनतिक्रम्य।

(v) कुम्भं करोति यः सः।

(vi) राजा चासौ ऋषिश्च

(vii) राज्ञः पुरुषः।

(e) वरं बुद्धिर्न सा विद्या विद्यास्य बुद्धिरुत्तमा।
बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः।।– व्याख्यायताम्।

(f) यस्य न जायते शीलं न कुलं न च संश्रयः।
न तेन सङ्गतिं कुर्य्यादित्युवाच बृहस्पतिः।।– व्याख्यायताम्।

(g) योऽमित्रं कुरुते मित्रं वीर्य्याभ्याधिकमात्मनः।
स करोति न सन्देहः स्वयं हि विषभक्षणम्।।– व्याख्यायताम्।

**3.** अधोनिर्दिष्टेषु *एकः* प्रश्नः समाधेयः $10\times1=10$

(a) कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्राः परस्परं मित्रतां गता वसन्ति स्म। ते चापि दारिद्रयोपहताः परस्परं मन्त्रं चक्रुः। ''अहो धिगियं दरिद्रता। तद्गच्छामः कुत्रचिदर्थाय'' इति संमन्त्र्य स्वदेशं पुरं च स्वसुहृत्सहितं बान्धवयुतं गृहं च परित्यज्य प्रस्थिताः। एंव क्रमेण गच्छन्तोऽवन्तीं प्राप्ताः। तत्र सिप्राजले कृतस्नाता महाकालं प्रणम्य यावन्निर्गच्छन्ति, तावद् भैरवानन्दो नाम योगी सम्मुखो बभूव। ततस्तं ब्राह्मणोचितविधिना सम्भाव्य तैरभिहितम् अद्भुतशक्तिर्भवान् श्रूयते। तत् कथ्यताम् अस्माकं कश्चिद्धनलाभोपायः'' इति।

(i) ब्राह्मणपुत्राः कुत्र कथं प्रतिवसन्ति स्म? $2\times5=10$

(ii) दारिद्र्योपहतेन ब्राह्मणचतुष्टयेन किं मन्त्रितम्?

(iii) भैरवानन्दः कः आसीत्?

(iv) कदा ब्राह्मणपुत्राः भैरवानन्दं दृष्टवन्तः?

(v) ब्राह्मणपुत्राः भैरवानन्दं किम् उक्तवन्तः?

(b) अनुच्छेदं पठित्वा निम्नप्रदत्ताः प्रश्नाः समाधेयाः।

अस्ति कस्मिंश्चित् समुद्रोपकण्ठे महान् जम्बुपादपः सदाफलः, तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म। तत्रच तस्य तरोरधः कदाचित् कशलमुखो नाम मकरः समुद्रसलिलान्निष्क्रम्य सुकोमलवालुकासनाथे तीरोपान्ते निविष्टः। ततश्च रक्तमुखेन स प्रोक्तः भोः। भवान् अभ्यागतोऽतिथिः। तद् भक्षयतु मया दत्तानि अमृतकल्पानि जम्बुफलानि। एवमुक्त्वा। तस्मै जम्बुफलानि प्रपच्छति। सोऽपि तानि भक्षयित्वा तेन सह चिरं गोष्ठीसुखमनुभूय भूयोऽपि स्वभवनमगमत्।

(i) वानरः कुत्र प्रतिवसति स्म? 2×5=10

(ii) किमासीत् मकरस्य नाम?

(iii) स कुतो निष्क्रम्य कस्मिन् स्थाने निविष्टः?

(iv) केन प्रकारेण गोष्ठीसुखम् अनुभूतं करालमुखेन?

(v) जम्बुपादपः कुत्र कीदृशश्च आसीत्?

(c) अनुच्छेदं पठित्वा निम्नप्रदत्ताः प्रश्नाः समाधेयाः।

अस्ति दाक्षिणात्ये पाटलिपुत्रं नाम नगरम्। तत्र मणिभद्रो नाम श्रेष्ठी प्रतिवसति स्म। अस्य विधिवशाद्धनक्षयः सञ्जातः। ततो विभवक्षयादपमानपरम्परया परं विषण्णः स चिन्तितवान् – "अहो धिक् इयम् दरिद्रता। अतः निर्द्धनोऽहमनशनम् कृत्वा प्राणान् उत्सृजामि।" एंव निश्चयं कृत्वा सुप्तस्य तस्य स्वप्ने पद्मनिधिः क्षपणकरूपी दर्शनं दत्त्वा प्रोवाच– भोः श्रेष्ठिन् मा त्वं वैराग्यं गच्छ।

(i) पाटलिपुत्रनगरं कुत्र आसीत्? 2×5=10

(ii) तत्र कः प्रतिवसति स्म?

(iii) कथं मणिभद्रः दुःखित जातः?

(iv) पद्मनिधिः केन रूपेण वणिजः स्वप्ने आयातः?

(v) श्रेष्ठी किं चिन्तितवान्?

# B.A. 3rd Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 30911** **Course Code : AH/SNS-301C-5**

Course Title: Vedic Literature

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु प्रश्नेषु *पञ्चप्रश्नाः* लघुतया च समाधेयाः। *एकस्य* उत्तरम् अवश्यमेव संस्कृतभाषया देवनागरलिप्या च प्रदेयम्। 2×5=10

(a) विनियोगस्य कति भेदाः? के च ते?

(b) किं नाम सूक्तम्? ऋग्वेदसंहितायां कति सूक्तानि प्राप्यन्ते?

(c) इन्द्र-सूक्तस्य कः ऋषिः? किं च छन्दः?

(d) 'ईळे' इति पदस्य लौकिकं रूपमर्थेन सह लिखत।

(e) हिरण्यगर्भशब्दस्य कोऽर्थः? अक्षसूक्तं कस्मिन् मण्डले वर्तते?

(f) 'व्यवहिताश्च' इति सूत्रस्य सोदाहरणम् अर्थं लिखत।

(g) 'स जनासः इन्द्रः' इत्यत्र 'जनासः' इति पदं कथं निष्पद्यते? 'गन्तवै' इति रूपं वैदिकसंहितायां कथं जायते?

(h) स्तोत्रं नाम किम्? किं च शस्त्रम्?

**2.** कस्य*चिदेकस्य* भाष्यवचनस्य तात्पर्यं सप्रसङ्गं संस्कृतभाषया देवनागरलिप्या च लेख्यम्। 5×1=5

(a) अभिप्लवषडहस्य मध्यवर्त्तिषूक्थ्येषु तृतीयसवने मैत्रावरुणस्य 'अग्ने यं यज्ञम्' इत्यादिको वैकल्पिकोऽनुरूपस्तृचः।

(b) संसवे निष्केवल्ये निविद्धानीयस्य पुरस्ताद् 'यो जात एव' इति संशेत्।

**3.** अधस्तात् कस्य*चिदेकस्य* मन्त्रस्य ऋषिच्छन्दोदेवताविनियोगनिर्देशपूर्वकं व्याख्यानं संस्कृतभाषया देवनागरलिप्या च कुरुत। 5×1=5

(a) अ॒ग्निः पूर्वेभिर्ऋषिभि॒-
री॒ड्यो॒ नूतनैरुत।
स दे॒वाँ एह व॑क्षति।।

(b) अ॒क्षैर्मा दी॑व्यः कृ॒षिमित् कृ॑षस्व
वि॒त्ते र॑मस्व ब॒हु मन्य॑मानः।
यत्र॒ गाव॑ः कितव॒ तत्र॑ जा॒या
तन्मे॒ वि च॑ष्टे सवि॒तायमर्यः।।

**4.** उपर्युक्तयोः [3.(a), (b) इत्यनयोः] मन्त्रयोः *कस्यचिदेकस्य* मन्त्रस्य पदपाठो विधेयः। 5×1=5

**5.** अधोनिर्दिष्टेषु *एकम्* आश्रित्य टीका संस्कृतभाषया देवनागरलिप्या च लेख्या। 5×1=5
वैदिकः उपसर्गः, वैदिकं शब्दरूपम्, वैदिकः लुङ्लकारः।

**6.** अधस्तात् *कस्यचिदेकस्य* प्रश्नस्योत्तरं वैशद्येन संस्कृतभाषया देवनागरलिप्या च विधेयम्। 10×1=10

(a) अग्निदेवस्य माहात्म्यं वेदे यथा वर्णितं तथा वैशद्येन विवृणुत।

(b) हिरण्यगर्भसूक्तं दार्शनिकसूक्तं न वेति विशदतया विचार्य्यताम्।

(c) अक्षनिन्दा कृषिमाहात्म्यं च सूक्तमध्ये यथा दृश्यते सूक्तमाश्रित्य तत्सर्वं विशद्यताम्।